शाकवीरः, पुं, ( शाकेषु वीरः । ) वास्तूकशाकः । इति त्रिकाण्डशेषः ॥ जीवशाकः । इति राजनिर्घण्टः ॥

शाकवृक्षः, पुं, ( शाकाख्यो वृक्षः । ) तरुविशेषः । इति रत्नमाला ॥ सेगोन इति भाषा । अस्य पर्य्यायगुणौ शाकशब्दे द्रष्टव्यौ ॥

शाकशाकटं, क्ली, ( शाकानां भवनं क्षेत्रम् । शाक + "भवने क्षेत्रे शाकटशाकिनौ ।" इति शाकटः । ) शाकक्षेत्रम् । इति हेमचन्द्रः ॥

शाकशाकिनं, क्ली, ( शाकानां भवनं क्षेत्रम् । शाक + शाकिनः । ) शाकक्षेत्रम् । इति हेमचन्द्रः ॥

शाकश्रेष्ठः, पुं, ( शाकेषु श्रेष्ठः । ) वास्तूकशाकम् । इति शब्दरत्नावली ॥

शाकश्रेष्ठा, स्त्री, ( शाकेषु श्रेष्ठा । ) जीवन्ती । डोडीक्षुपः । वार्त्ताकुः । इति राजनिर्घण्टः ॥

शाका, स्त्री, हरीतकी । इति केचित् ॥

शाकाख्यं, क्ली, ( शाक इति आख्या यस्य । ) पत्रपुष्पादि । इत्यमरः ॥
"अन्नेनयोग्यं पत्रपुष्पादि शाकपदवाच्यम् । आदिना फलमूलादिग्रहः । यदुक्तम् ।
'मूलपत्रकरीराग्रफलकाण्डाधिरूढकम् ।
त्वक् पुष्पं कवकञ्चैव शाकं दशविधं स्मृतम् ॥'
तत्र मूलं मूलकादेः । पत्रं पटोलादेः । करीरं वंशाङ्कुरादि । अग्रं वेत्रादेः । फलं कुष्माण्डादेः । काण्डं उत्पलादिनाडी । अधिरूढं तालास्थिमज्जा । अधिरूढोऽङ्कुर इति केचित् । त्वक् मातुलुङ्गादेः । पुष्पं कोविदारादेः । कवकं छत्रिका । शक्यते भोक्तुमनेनेति शाकम् । शक्नोति सामर्थ्यं तनूकरोति शो तनूकरणे बाहुल्यात् कः शाकमित्यन्ये ।" इति तट्टीकायां भरतः ॥

शाकाख्यः, पुं, (शाक इति आख्या यस्य ।) शाकवृक्षः । इति रत्नमाला ॥ अस्य पर्य्यायगुणौ शाकशब्दे द्रष्टव्यौ ॥

शाकाङ्गं, क्ली, ( शाकस्य अङ्गमिव । ) मरिचम् । इति राजनिर्घण्टः ॥

शाकाम्लं, क्ली, ( शाके अम्लो यस्य । ) वृक्षाम्लम् । इति राजनिर्घण्टः ॥

शाकाम्लभेदनं, क्ली, (शाकाम्लं भेदनञ्च ।) चुक्रम् । इति राजनिर्घण्टः ॥

शाकालावुः, स्त्री, राजालावुः । इति राजनिर्घण्टः ॥

शाकाष्टका, स्त्री, ( शाका अष्टौ प्रदेया यत्र । ) शाकोपकरणकश्राद्धाष्टमी । सा च गौणफाल्गुनकृष्णाष्टमी । तद्विवरणं मांसाष्टकाशब्दे द्रष्टव्यम् ॥

शाकिनी, स्त्री, (शाकोऽस्त्यस्येति । शाक + इनिः ।) शाकयुक्ता भूमिः । यथा,—
"शकटः शाकिनी गावो जालमस्यन्दनं वनम् ।
अनूपं पर्व्वतो राजा दुर्भिक्षे नव वृत्तयः ॥"
शकटो धान्यादिवहनद्वारेणोपजीव्यः ।
"पत्रं पुष्पं फलं कन्दं नालं संस्वेदजं तथा ।
शाकं षड्विधमुद्दिष्टं गुरु विद्यात् यथोत्तरम् ॥")
इति वैद्योक्तशाकयोगात् शाकिनी गृहवाटिका शाकाद्याहरणेन । गावो दुग्धादिना । जालं मत्स्याद्याहरणेन । अस्यन्दनं स्वस्थानादत्यागः ऋणादिलाभेन । यथाधिक्यनिवृत्त्या च । वनं फलपुष्पाद्याहरणेन । अनूपं बहूदकदेशः सम्बुकालशालूकाद्याहरणेन । पर्व्वतो गैरिकस्वर्णाद्याहरणेन । राजा भिक्षादिना । इत्याह्निकतत्त्वम् ॥ * ॥ दुर्गाया अनुचरीविशेषः । यथा,—
"डाकिनी योगिनी चैव खेचरी शाकिनी तथा ।
दिक्षु पूज्या इमा देव्यः सुसिद्धाः फलदायिकाः ॥"
इति कात्यायनीकल्पः ॥
"ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः ।
ततः परशिवो देवि षट्शिवाः परिकीर्त्तिताः ॥
मूलाधारे तु ब्रह्माणं डाकिनीसहितं न्यसेत् ॥
सर्व्वञ्च चाचरीमुक्ता वादिसान्तं सबिन्दुकम् ॥
स्वाधिष्ठानाख्यचक्रे तु सविष्णुं राकिणीं तथा ।
वादिलान्तं प्रविन्यस्य नाभौ तु मणिपूरके ॥
डादिफान्तार्णसहितं रुद्रञ्च लाकिनीं तथा ।
अनाहते कादिठान्तं ईश्वरं काकिनीं तथा ॥
विशुद्धाख्ये महाचक्रे षोड़शस्वरसंयुतम् ।
सदाशिवं शाकिनीन्तु विन्यसेत् पूर्व्ववत्ततः ॥
आज्ञाचक्रे तु देवेशि ह-क्ष-वर्णसमन्वितम् ।
परं शिवं ब्रह्मरूपं हाकिनीसहितं न्यसेत् ॥"
इति ताराव्यासभेदः । इति तन्त्रसारः ॥

शाकुणः, त्रि, परोतापी । इति शब्दमाला ॥

शाकुनः, पुं, ( शकुनमधिकृत्य कृतो ग्रन्थः । शकुन + अण् । ) पशुपक्ष्यादिरूपशकुनद्वारा मनुष्यशुभाशुभनिश्चायकग्रन्थः । तस्येमौ श्लोकौ ।
"शुभाशुभज्ञानविनिर्णयाय
हेतुर्नृणां यः शकुनः स उक्तः ।
गतिः स्वरालोकनभावचेष्टाः
संकीर्त्तयामो द्विपदादिकानाम् ॥
लोकोऽमुना शाकुनसंज्ञकेन
ज्ञानेन विज्ञातसमस्तकार्य्यः ।
नापायकूपे पतति प्रसर्पन्
शास्त्रं हि दिव्या दृगतीन्द्रियेषु ॥"
इति वसन्तराजशाकुने १ सर्गः ॥
(शकुनस्यायमिति । शकुन + "तस्येदम् ।" ४ । ३ । १२० । इति अण् । पक्षिसम्बन्धी । यथा, मनुः । ३ । २६८ ।
"द्वौ मासौ मत्स्यमांसेन त्रीन्मासान् हारिणेन तु ।
औरभ्रेणाथ चतुरः शाकुनेनाथ पञ्च वै ॥")

शाकुनिकः, पुं, ( शकुनान् हन्तीति । शकुन + "पक्षिमत्स्यमृगान् हन्ति ।" ४ । ४ । ३५ । इति ठक् । ) पक्षिहन्ता । पाखिमारा इति चिड़िमार इति च भाषा । तत्पर्य्यायः । जीवान्तकः २ । इत्यमरः ॥ ( यथा, मनुः । ८ । २६० ।
"व्याधान् शाकुनिकान् गोपान् कैवर्त्तान् मूलखानकान् ॥")

शाकुनेयः, पुं, (शकुनेरपत्यम् । शकुनि + "शुभ्रादिभ्यश्च ।" ४ । १ । १२३ । इति ढक् ।) हुडुलपक्षी । इति राजनिर्घण्टः ॥ ( शकुनिपुत्रो वृकासुरः । यथा, भागवते । १० । ८८ । २६ ।
"शाकुनेय भवान् व्यक्तं श्रान्तः किं दूरमागतः ।
क्षणं विश्राम्यतां पुंस आत्मायं सर्व्वकामधुक् ॥")
शकुनसम्बन्धिनि, त्रि ॥

शाकुन्तलेयः, पुं, ( शकुन्तलाया अपत्यमिति । शकुन्तला + "स्त्रीभ्यो ढक् ।" ४ । १ । १२० । इति ढक् । ) भरतराजः । इति जटाधरः ॥ शकुन्तलासम्बन्धिनि, त्रि ॥

शाकुलिकः, त्रि, शकुलान् हन्ति यः । शकुलशब्दात् "पक्षिमत्स्यमृगान् हन्ति ।" ४ । ४ । ३५ । इति ठक्प्रत्ययेन निष्पन्नमेतत् । इति सिद्धान्तकौमुदी ॥

शाक्करः, पुं, ( शक्कर एव । स्वार्थे अण् । ) अनड्वान् । इति हेमचन्द्रः ॥

शाक्तः, त्रि, शक्तिर्देवता अस्य । (शक्ति + "साऽस्य देवता ।" ४।२।२४ । इत्यण् । ) शक्त्युपासकः । अस्य प्रशंसा यथा,—
"स्वर्गे मर्त्ये च पाताले नास्ति शाक्तात् परः प्रियः ।
सौराणां गाणपत्यानां वैष्णवानां तथैव च ॥
तदन्ते चैव शाक्ताः स्युः क्रमशः क्रमशः प्रिये ।
अस्य देवि वरारोहे नास्ति शाक्तात् परो जनः ॥
शाक्तोऽपि शङ्करः साक्षात् परं ब्रह्मस्वरूपभाक् ।
आराधिता येन काली तारा त्रिभुवनेश्वरी ॥
षोड़शी चैव मातङ्गी छिन्ना च बगलामुखी ।
आराधिता महेशानि स शिवो नात्र संशयः ॥
अतिगोप्यं महेशानि शाक्तानां परमं पदम् ।
यो जानाति महीमध्ये स शिवो नात्र संशयः ॥
ब्रह्माद्यर्चितपादाब्जं यो भजेत् सततं मुदा ।
स यात्यचिरकालेन मुक्तिमन्दिरमेव हि ।
पार्व्वतीचरणद्वन्द्वभजनाकिङ्करो भवेत् ।
स्वर्गभोगश्च मोक्षश्च शाक्तानां न भवेत् किम् ॥
शाक्तानाञ्चैव निन्दां ये कुर्व्वन्ति हि नराधमाः ।
तेषां लोहितपानं वै कुर्व्वन्ति भैरवीगणाः ॥
भैरवाश्चैव भैरव्यः सदा हिंसन्ति पामरान् ।
शाक्तान् हिंसन्ति गर्ज्जन्ति निन्दन्ति बहुजल्पकाः ॥
छिन्दन्ति तेषां देवेशि शिरांसि हरवल्लभा ।
शाक्तेभ्य उत्तमो नास्ति स्वर्गे मर्त्ये रसातले ॥
शाक्तस्तु शङ्करो ज्ञेयस्त्रिनेत्रश्चन्द्रशेखरः ।
स्वयं गङ्गाधरो भूत्वा विहरेत् क्षितिमण्डले ॥"
देवीं प्रति शिववाक्यम् ।
"मदंशाश्चैव ये भूतास्ते शैवा नात्र संशयः ।
त्वदंशाश्चैव शाक्ताश्च सत्यं वै गिरिनन्दिनि ।
बहुवर्षसहस्रान्ते शैवाः शक्तिपरायणाः ।
शाक्ता वै शङ्करा देवि यस्य कस्य कुलोद्भवाः ॥
चाण्डाला ब्राह्मणाः शूद्राः क्षत्त्रिया वैश्यसम्भवाः ।